यथा,—
"साध्यस्य व्यापको यस्तु हेतोरव्यापकस्तथा।
स उपाधिर्भवेत्तस्य निष्कर्षोऽयं प्रदर्शितः॥"
इति भाषापरिच्छेदः॥
आच्छादकः। यथा,—
"पदस्य व्यापकं सारमसन्दिग्धमनाकुलम्।
अशाखागम्यमित्येवमुत्तरं तद्विदो विदुः॥"
पदस्य भावार्थस्य व्यापकं आच्छादकं अभियोगाप्रतिकूलमिति यावत्। इति व्यवहारतत्त्वम्॥ (यथा, कुमारसम्भवे। ६। ७१।
"तिर्य्यगूर्द्ध्वमधस्ताच्च व्यापको महिमा हरेः॥")
व्यापकन्यासः, पुं, शिरसः पादान्तं पादतः शिरोऽन्तं मूलमन्त्रविन्यासः। यथा।
"आदाहव्यादिको न्यासः करशुद्धिस्ततः परम्।
अङ्गुलिव्यापकन्यासौ हृदादिन्यास एव च॥
तालत्रयञ्च दिग्बन्धः प्राणायामस्ततः परम्।
ध्यानं पूजा जपश्चैव सर्व्वतन्त्रेष्वयं विधिः॥"
इति तन्त्रसारः॥
प्रपञ्चस्तु न्यासशब्दे द्रष्टव्यः॥
व्यापद्, स्त्री, विपूर्व्वाङ्पूर्व्वपदधातोः क्विप्प्रत्ययेन निष्पन्नमेतत्॥ मृत्युः। आपत्। (यथा, कथासरित्सागरे। २६। १०६।
"यस्य त्वमूढता व्यापदिहापि फलिता मम॥")
व्यापनं, क्ली, (वि + आप + ल्युट्।) आच्छादनम्। व्याप्तिः। यथा। अत्र लङ्घनमसंक्रमश्च रवेस्तदा भवति यदा तन्मासतत्पूर्व्वमासान्त्यक्षणयोरेकराश्यवस्थितस्य तन्मासान्तरमेव राश्यन्तरसंयोगः न त्वेकराशिस्थितस्य मासव्यापनमात्रम्। इति मलमासतत्त्वम्॥
व्यापन्नः, त्रि, (वि + आ + पद + क्तः।) मृतः। इति हेमचन्द्रः॥
व्यापादः, पुं, (वि + आ + पद + घञ्।) द्रोहचिन्तनम्। इत्यमरः॥ (यथा, राजतरङ्गिण्याम्। ८। ३१११।
"इत्युदीर्य्य नृपः सुप्तैः सभ्यो व्यापादविह्वये॥")
व्यापादनं क्ली, (वि + आ + पद + णिच् + ल्युट्।) मारणम्। इति हेमचन्द्रः॥ (यथा, मार्कण्डेये। २९। ३२।
"अतीते च दिने बालामात्मव्यापादनोद्यताम्।
सुरभिः प्राह गायं त्वां प्राथ्यते दानवाधमः॥")
परानिष्टचिन्तनम्। इत्यमरटीकायां रामाश्रमः॥
व्यापादितः त्रि, (वि + आ + पद + णिच् + क्तः।) मारितः। यथा,—
"एका चेद्बहुभिः क्वापि दैवाद्व्यापादिता भवेत्।
पादं पादञ्च हत्यायाश्चरेयुस्ते पृथक् पृथक्॥"
इति प्रायश्चित्ततत्त्वधृतसम्वर्त्तवचनम्॥
व्यापिका, स्त्री, (व्यापक + टापि अत इत्वम्।) व्यापिनी। यथा,—
"अधर्म्मपत्नी मिथ्या सा सर्व्वधूर्त्तैश्च पूजिता।
यया विना जगन्मुक्तसुच्छन्नं विधिनिर्म्मितम्॥
सत्ये चादर्शना या च त्रेतायां सूक्ष्मरूपिणी।
अर्द्धावयवरूपा च द्वापरे संवृता भिया॥
कलौ महाप्रगल्भा च सर्व्वत्र व्यापिका भवेत्।
कपटेन समं भ्रात्रा भ्रमत्येव गृहे गृहे॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे १ अध्यायः॥
व्यापारः, पुं, (वि + आ + पृ + घञ्।) कर्म्म। यथा,—
"स्यात् प्राणवियोगफलको व्यापारो हननं स्मृतम्।
रागाद्द्वेषात् प्रमादाद्वा स्वतः परत एव वा॥"
इति प्रायश्चित्ततत्त्वधृतासिपुराणवचनम्॥
(साहाय्यम्। इति मल्लिनाथः॥ यथा, कुमारे। ६। ३२।
"आर्य्याप्यरुन्धती तत्र व्यापारं कर्त्तुमर्हति।
प्रायेणैवंविधे कार्य्ये पुरन्ध्रीणां प्रगल्भता॥"
तज्जन्यत्वे सति तज्जन्यजनकः। इति न्यायशास्त्रम्॥ यथा, भाषापरिच्छेदे।
"विषयेन्द्रियसंयोगो व्यापारः सोऽपि षड्विधः॥")
व्यापारी, [न्] त्रि, (व्यापारोऽस्यास्तीति। व्यापार + इनिः।) व्यापारविशिष्टः। व्यवसायी। यथा,—
"ब्राह्मणोऽहारिव्यापारी रसादिविक्रयी च यः।
स याति नागवेष्टञ्च नागैर्वेष्टित एव च॥"
इति ब्रह्मवैवर्त्तपुराणम्॥
व्यापी, [न्] पुं, (व्याप्नोति सर्व्वमिति। वि + आप + णिनिः।) विष्णुः। यथा,—
"स्वपनः स्ववशो व्यापी नैकात्मा नैककर्म्मकृत्॥"
इति महाभारते।
तस्य सहस्रनामस्तोत्रे। १३। १४९।९२॥ त्रि, व्यापकः। यथा,—
"त्रिसन्ध्यव्यापिनी या तु सैव पूर्णा सदा तिथिः।
न तत्र युग्मादरणमन्यत्र हरिवासरात्॥"
इति तिथ्यादितत्त्वधृतपराशरवचनम्॥
व्यापृतः, पुं, (वि + आ + पृ + क्तः।) कर्म्मसचिवः। यथा,—
"नियोगी कर्म्मसचिव आयुक्तो व्यापृतश्च सः॥"
इति हेमचन्द्रः॥
व्यापारयुक्ते, त्रि। वि-आङ्-पूर्व्व-पृ-धातोः क्तप्रत्ययेन निष्पन्नः॥ (यथा, उत्तरचरिते। १।
"आश्लिष्टशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत्॥")
व्याप्तं, त्रि, (वि + आप् + क्तः।) सम्पूर्णम्। तत्पर्य्यायः। पूर्णम् २ आचितम् ३ छन्नम् ४ पूरितम् ५ भरितम् ६ निचितम् ७। इति हेमचन्द्रः॥ (यथा, गीतायाम्। ११। २०।
"द्यावापृथिव्योरिदमन्तरं हि
व्याप्तं त्वयैकेन दिशश्च सर्व्वाः॥")
ख्यातम्। समाक्रान्तम्। इति मेदिनी॥ ख्यापितम्। यथा। प्राप्तं प्रणिहिते समे इत्यत्र व्याप्तमपि पाठः। इत्यमरटीकायां रायमुकुटः॥
व्याप्तिः, स्त्री, (वि + आप् + क्तिन्।) व्यापनम्। (यथा, भागवते। ७। ८। १७।
"सत्यं विधातुं निजभृत्यभाषितं
व्याप्तिञ्च भूतेषु खिलेषु चात्मनः॥")
इभ्भः। इति मेदिनी॥ इभ्भस्थाने लम्भनमिति हेमचन्द्रे पाठः॥ शिवस्याष्टैश्वर्य्यान्तर्गतैश्वर्य्यविशेषः। यथा,—
"अणिमा लघिमा व्याप्तिः प्राकाम्यं महिमेशिता।
वशित्वकामावसायित्वे ऐश्वर्य्यमष्टधा स्मृतम्॥"
इति शब्दमाला॥ *॥
न्यायमते साध्यवदन्यावृत्तित्वम्। यथा। वह्न्यभावस्थाने धूमस्यावर्त्तमानत्वम्। इयं अन्वयव्याप्तिः। अस्या ज्ञानं प्रति व्यभिचारज्ञानाभावः सहचारज्ञानञ्च कारणम्। एवं साध्याभावव्यापकीभूताभावप्रतियोगित्वम्। इयं व्यतिरेकव्याप्तिः। अस्या ज्ञानं प्रति साध्याभाव एवं हेत्वभावस्य सहचारज्ञानं व्यभिचारज्ञानाभावश्च कारणं तत्र प्रमाणम्।
"व्याप्तिः साध्यवदन्यस्मिन्नसम्बन्ध उदाहृतः।
अथवा हेतुमन्निष्ठविरहाप्रतियोगिना॥
साध्येन हेतोरैकाधिकरण्यं व्याप्तिरुच्यते।
व्यभिचारस्याग्रहोऽपि सहचारग्रहस्तथा॥
हेतुर्व्याप्तिग्रहे तर्कः क्वचित् शङ्कानिवर्त्तकः।
द्वैविध्यन्तु भवेद्व्याप्तेरन्वयव्यतिरेकतः॥
अन्वयव्याप्तिरुक्तैव व्यतिरेकादथोच्यते।
साध्याभावव्यापकत्वं हेत्वभावस्य यद्भवेत्॥"
इति भाषापरिच्छेदः॥
व्याप्तिकर्म्मा, [न्] पुं, (व्याप्तिविशिष्टं कर्म्म यस्य।) व्यापनक्रियाविशिष्टः। सर्व्वत्र व्याप्तक्रियः। तद्वैदिकपर्य्यायः। इन्वति १ नक्षति २ आक्षाणः ३ आनट् ४ आष्ट ५ आपानः ६ अशत् ७ नशत् ८ आनशे ९ अश्नुते १०। इति दश व्याप्तिकर्म्माणः। इति वेदनिघण्टौ २ अध्याये। १८॥
व्याप्यं, क्ली, (व्याप्यते इति। वि + आप् + ण्यत्।) साधनम्। यथा। व्याप्यं लिङ्गञ्च साधनम्। इति सङ्कीर्णवर्गे त्रिकाण्डशेषः॥ कुष्ठौषधम्। इत्यमरः॥
व्याप्यः, त्रि, (वि + आप् + ण्यत्।) व्याप्तिविशिष्टः। व्यापनीयः। यथा,—
"प्रस्थानं ते कुलिशकलनाश्चिन्तितं पक्षिताप्येरक्षितेऽस्माकं तदपि रमते याचि याहीति वाणी।
अप्रामाण्यं कथयति सदा नन्दनोर्वियोगो व्याप्यज्ञानादृजकुलधुरां व्यापकस्यापि सिद्धौ॥"
इति पदाङ्कदूतः॥
(यथा, भागवते। ७। ६। २२।
"प्रत्यगात्मस्वरूपेण दृश्यरूपेण च स्वयम्।
व्याप्यव्यापकनिर्द्देश्यो ह्यनिर्द्देश्योऽविकल्पितः॥")
व्यामः, पुं, (विशेषेण अम्यतेऽनेनेति। अम गतौ + घञ्।) तिर्य्यक्पार्श्वे ततयोः सहकयोर्बाह्वोरन्तरम्। वेँउ इति भाषा। व्यामीयतेऽनेन व्यामः शङ्कोः कभाव इत्युणादौ उः। इत्यमरभरतौ॥ "व्यामव्यायामन्यग्रोधास्तिर्य्यक्बाह्